श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री अनन्ताळ्वान् विरचित

# ॥ श्रीगोदाचतुःश्लोकी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीगोदाचतुःश्लोकी ॥

नित्या भूषा निगमशिरसां निस्समोत्तुङ्गवार्ता
कान्तो यस्याः कचविलुलितैः कामुको माल्यरत्नैः।
सूक्त्या यस्याः श्रुतिसुभगया सुप्रभाता धरित्री
सैषा देवी सकल जननी सिञ्चतां मामपाङ्गैः॥ १॥

माता चेत्तुलसी पिता यदि तव श्रीविष्णुचित्तो महान्
भ्राता चेद्यतिशेखरः प्रियतमः श्रीरङ्गधामा यदि।
ज्ञातारस्तनयाः त्वदुक्तिसरसस्तन्येन संवर्धिताः
गोदा देवि ! कथं त्वमन्यसुलभा साधारणा श्रीरसि॥ २॥

कल्पादौ हरिणा स्वयं जनहितं दृष्ट्वैव सर्वात्मनां
प्रोक्तं स्वस्य च कीर्तनं प्रपदनं स्वस्मै प्रसूनार्पणम्।
सर्वेषां प्रकटं विधातुमनिशं श्रीधन्विनव्ये पुरे
जातां वैदिकविष्णुचित्ततनयां गोदामुदारांस्तुमः॥ ३॥

आकूतस्य परिष्क्रियामनुपमामासेचनं चक्षुषोः
आनन्दस्य परंपरामनुगुणामारामशैलेशितुः।
तद्दोर्मध्य किरीटकोटिघटित स्वोच्छिष्ट कस्तूरिका
माल्यामोदसमेधितात्मविभवां गोदामुदारांस्तुमः॥ ४॥

॥ इति श्रीगोदाचतुःश्लोकी समाप्ता ॥